।। श्रीः ।।

श्रीमत्पिङ्गलाचार्यविरचितं

# छन्दःशास्त्रम् ।

श्रीमद्भट्टहलायुधप्रणीतमृतसंजीविन्याख्यवृत्तिसमेतम् ।

अथ प्रथमोऽध्यायः ।

धीश्रीस्त्री म् ।।१।।

वरासा य् ।।२।।

कागुहा र् ।।३।।

वसुधा स् ।।४।।

सातेक्व त् ।।५।।

कदास ज् ।।६।।

किंवद भ् ।।७।।

नहस न् ।।८।।

गृ ल् ।।९।।

गन्ते ।।१०।।

ध्रादिपरः ।।११।।

हे ।।१२।।

लौ सः ।।१३।।

ग्लौ ।।१४।।

अष्टौ वसव इति ।।१५।।

इति प्रथमोऽध्यायः ।।१।।

अथ द्वितीयोऽध्यायः ।

छन्दः ।।१।।

गायत्री ।।२।।

दैव्येकम् ।।३।।

आसुरी पञ्चदश ।।४।।

प्राजापत्याष्टौ ।।५।।

यजुषां षट् ।।६।।

साम्नां द्विः ।।७।।

ऋचां त्रिः ।।८।।

द्वौ द्वौ साम्नां वर्धेत ।।९।।

त्रींस्त्रीनृचाम् ।।१०।।

चतुरश्चतुरः प्राजापत्यायाः ।।११।।

एक कं शेष ।।१२।।

जह्यादासुरी ।।१३।।

तान्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यः ।।१४।।

तिस्रस्तिस्रः सनाम्न्य एक का ब्राह्म्यः ।।१५।।
प्राग्यजुषामार्ष्य इति ।।१६।।

इति द्वितीयोऽध्यायः ।।२।।

अथ तृतीयोऽध्यायः ।

पादः ।।१।।
इयादिपूरणः ।।२।।
गायत्र्या वसवः ।।३।।
जगत्या आदित्याः ।।४।।
विराजो दिशः ।।५।।
त्रिष्टुभो रुद्राः ।।६।।
एकद्वित्रिचतुष्पादुक्तपादम् ।।७।।
आद्यं चतुष्पादृतुभिः ।।८।।
क्वचित्त्रिपादृषिभिः ।।९।।
सा पादनिचृत् ।।१०।।
षट्कसप्तकयोर्मध्येऽष्टावतिपादनिचृत् ।।११।।
द्वौ नवकौ षट्कश्च नागी ।।१२।।
विपरीता वाराही ।।१३।।
षट्कसप्तकाष्टक वर्धमाना ।।१४।।
विपरीता प्रतिष्ठा ।।१५।।
तृतीयं द्विपाज्जागतगायत्राभ्याम् ।।१६।।
त्रिपात्त्रैष्टुभैः ।।१७।।
उष्णिग्गायत्रौ जागतश्च ।।१८।।
ककुम्मध्ये चेदन्त्यः ।।१९।।
पुरउष्णिक्पुरः ।।२०।।
परोष्णिक्परः ।।२१।।
चतुष्पादृषिभिः ।।२२।।
अनुष्टुब्गायत्रैः ।।२३।।
त्रिपात्क्वचिज्जागताभ्यां च ।।२४।।
मध्येऽन्ते च ।।१५।।
बृहती जागतस्त्रयश्च गायत्राः ।।१६।।
पथ्या पूर्वश्चेत्तृतीयः ।।२७।।
न्यङ्कुसारिणी द्वितीयः ।।२८।।
स्कन्धोग्रीवी क्रौष्टुकेः ।।२९।।
उरोबृहती यास्कस्य ।।३०।।
उपरिष्टाद्बृहत्यन्ते ।।३१।।
पुरस्ताद्बृहती पुरः ।।३२।।
क्वचिन्नवकाश्चत्वारः ।।३३।।

विराजौ गायत्रौ च ॥३४॥
त्रिभिर्जागतैर्महाबृहती ॥३५॥
सतोबृहती ताण्डिनः ॥३६॥
पङ्क्तिर्जागतौ गायत्रौ च ॥३७॥
पूर्वौ चेदयुजौ सतः पङ्क्तिः ॥३८॥
विपरीतौ च ॥३९॥
प्रस्तारपङ्क्तिः पुरतः ॥४०॥
आस्तारपङ्क्तिः परतः ॥४१॥
विष्टारपङ्क्तिरन्तः ॥४२॥
संस्तारपङ्क्तिर्बहिः ॥४३॥
अक्षरपङ्क्तिः पञ्चकाश्चत्वारः ॥४४॥
द्वावप्यल्पशः ॥४५॥
पदपङ्क्तिः पञ्च ॥४६॥
चतुष्कषट्कौ त्रयश्च ॥४७॥
पथ्या पञ्चभिर्गायत्रैः ॥४८॥
जगती षड्भिः ॥४९॥
एकेन त्रिष्टुब्ज्योतिष्मती ॥५०॥
तथा जगती ॥५१॥
पुरस्ताज्ज्योतिः प्रथमेन ॥५२॥
मध्येज्योतिर्मध्यमेन ॥५३॥
उपरिष्टाज्ज्योतिरन्त्येन ॥५४॥
एकस्मिन्पञ्चके छन्दः शङ्कुमती ॥५५॥
षट्के ककुम्मती ॥५६॥
त्रिपादणिष्ठमध्या पिपीलिकमध्या ॥५७॥
विपरीता यवमध्या ॥५८॥
ऊनाधिकेनैकेन निचृद्भुरिजौ ॥५९॥
द्वाभ्यां विराट्स्वराजौ ॥६०॥
आदितः सन्दिग्धे ॥६१॥
देवतादितश्च ॥६२॥
अग्निः सविता सोमो बृहस्पतिर्मित्रावरुणाविन्द्रो विश्वेदेवा देवताः ॥६३॥
स्वराः षड्जादयः ॥६४॥
सितसारङ्गपिशङ्गकृष्णनीललोहितगौरा वर्णाः ॥६५॥
आग्निवेश्यकाश्यपगौतमाङ्गिरसभार्गवकौशिकवासिष्ठानि गोत्राणि ॥६६॥

इति तृतीयोऽध्यायः ॥३॥

अथ चतुर्थोऽध्यायः ।

चतुःशतमुत्कृतिः ।।१।।

चतुरश्चतुरस्त्यजेदुत्कृतेः ।।२।।

तान्यभिसंव्याप्रेभ्यः कृतिः ।।३।।

प्रकृत्या चोपसर्गवजितः ।।४।।

धत्यष्टिशक्वरीजगत्यः ।।५।।

पृथक्पृथक्पूर्वत एतान्येवैषाम् ।।६।।

द्वितीयं द्वितीयमतितः ।।७।।

अथ लौकिकम ।।८।।

आत्रैष्टुभाच्च यदार्षम् ।।९।।

पादश्चतुर्भागः ।।१०।।

यथावृत्तसमाप्तिर्वा ।।११।।

लः समुद्रा गणाः ।।१२।।

गौ गन्तमध्यादिर्न्लश्च ।।१३।।

स्वरा अर्धं चार्यार्धम् ।।१४।।

अत्रायुङ् न ज् ।।१५।।

षष्ठो ज् ।।१६।।

न्लौ वा ।।१७।।

न्लौ चेत्पदं द्वितीयादि ।।१८।।

सप्तमः प्रथमादि ।।१९।।

अन्त्ये पञ्चमः ।।२०।।

षष्ठश्च ल् ।।२१।।

त्रिषु गणेषु पादः पथ्याद्य च ।।२२।।

विपुलान्या ।।२३।।

चपला द्वितीयचतुर्थौ ग्मध्ये जौ ।।२४।।

पूर्वे मुस्वपूर्वा ।।२५।।

जघनपूर्वेतरत्र ।।२६।।

उभयोर्महाचपला ।।२७।।

आद्यर्धसमा गीतिः ।।२८।।

अन्त्येनोपगीतिः ।।२९।।

उत्क्रमेणोद्गीतिः ।।३०।।

अर्धे वसुगण आर्यागीतिः ।।३१।।

वैतालीयं द्विःस्वरा अयुक्पादे युग्वसवोऽन्ते ल्र्गः ।।३२।।

गौपच्छन्दसकम् ।।३३।।

आपातलिका भ्गौ ग् ।।३४।।

शेषे परेण युङ् न सम्रकम् ।।३५।।

षट् चामिश्रा युजि ।।३६।।

पञ्चमेन पूर्वः साकं प्राच्यवृत्तिः ।।३७।।

अपुकृतीयेनोदीच्यवृत्तिः ।।३८।।

आभ्यां युगपत्प्रवृत्तकम् ।।३९।।

अयक्चारुहासिनी ।।४०।।

युगपरान्तिका ।।४१।।

गन्ता द्विर्वसवो मोत्रासमकं ल् नवमः ।।४२।।

द्वादशश्च वानवासिका ।।४३।।

विश्लोकः पञ्चमाष्टमौ ।।४४।।

चित्रा नवमश्च ।।४५।।

परयुक्तेनोपचित्रा ।।४६।।

एभिः पादाकुलकम् ।।४७।।

गीत्यर्या लः ।।४८।।

शिखा विर्पयस्तार्धा ।।४९।।

लः पूर्वश्चेज्जयोतिः ।।४०।।

गश्चेत्सौम्या ।।४१।।

चूलिकैकोनत्रिंशदेकत्रिंशदन्ते ग् ।।४२।।

सा ग् येन न समा लां ग्ल इति ।।४३।।

इति चतुर्थोऽध्याये ।।४।।